Downloaded From :http://cbseportal.com/

This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No.
अनुक्रमाङ्कः

Code No. 59/SS/O
गूढसंख्या

Set
स्तबकः **A**

# SANSKRIT VYAKARAN
# संस्कृतव्याकरणम्
# (346)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ____________________

**Signature of Invigilators** 1. ____________________
**(निरीक्षकयोः हस्ताक्षरम्)**
2. ____________________

**सामान्या निर्देशा :**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।
3. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या **59/SS/O,** सेट-A नूनं लेख्या ।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।



Downloaded From :http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

# SANSKRIT VYAKARAN

## संस्कृतव्याकरणम्

## (346)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)] [पूर्णाङ्काः (Full Marks) : 100

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे [A] भागे **10**, [B] भागे **10**, [C] भागे **10,** [D] भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

**[A]** दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) तत्पुरुषसंज्ञाविधायकं सूत्रं किम् ।

(क) संख्यापूर्वो द्विगुः (ख) द्विगुरेकवचनम्

(ग) द्विगुश्च (घ) स नपुंसकम्

(2) तद्धितार्थोत्तरपदसमाहारे च इति सूत्रे उत्तरपदे इति का सप्तमी ।

(क) वैषयिकाधिकरणे (ख) परसप्तमी

(ग) वाच्याधिकरणे सप्तमी (घ) निर्धारणे

(3) किमः क्षेपे इति सूत्रेण किं भवति ।

(क) तत्पुरुषसमासः (ख) द्विगुसमासः

(ग) समासान्तः टच् (घ) समासान्तटचः निषेधः

(4) अजाद्यतष्टाप् इति सूत्रस्य इदम् उदाहरणं नास्ति ।

(क) गङ्गा (ख) यमुना

(ग) शाला (घ) बहुयज्वा

(5) अनद्यतनभूते एव लकारविधायकं सूत्रं किम् ।

(क) लुङ् (ख) लृट् शेषे च

(ग) अनद्यतने लुट् (घ) अनद्यतने लङ्



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From :http://cbseportal.com/

(6) अपठत् इत्यत्र तिपः इलोपः केन सूत्रेण ।

(क) इतश्च (ख) आटश्च

(ग) अतो येयः (घ) अतो हेः

(7) णलुत्तमो वा इति सूत्रेण विधीयते ।

(क) णित्त्वाभावः (ख) वृद्ध्यभावः

(ग) णित्त्वम् (घ) णित्त्वविकल्पः

(8) ग्लैधातोः अर्थः कः ।

(क) गतिः (ख) व्यक्ता वाक्

(ग) हर्षक्षयः (घ) रक्षणम्

(9) जिघत्स इत्यस्य धातुसंज्ञाविधायकं सूत्रं किम् ।

(क) भूवादयो धातवः (ख) सनाद्यन्ता धातवः

(ग) धातोः (घ) तत्प्रयोजको हेतुश्च

(10) कर्मणि विहितस्य लकारस्य स्थाने आत्मनेपदविधायकं सूत्रम् किम् ।

(क) आनुदात्तङ्ति आत्मनेपदम् (ख) तङानावात्मनेपदम्

(ग) भावकर्मणोः (घ) णिचश्च

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत । **2×10=20**

(1) समासस्य कानि फलानि । का वृत्तिः । 1+1

(2) ग्रामगतः इत्यत्र ग्रामपदस्य पूर्वनिपातः केन सूत्रेण । कश्च तत्सूत्रार्थः । 1+1

(3) ऊरीकृत्य इत्यत्र गतिसंज्ञा कस्य । केन सूत्रेण । 1+1

(4) द्वादश इत्यत्र आत् केन सूत्रेण । कश्च तत्सूत्रार्थः । 1+1

(5) आहिताग्निः अग्न्याहितः इति अनयोः कतरद् रूपं साधु । पूर्वपरनिपातनिर्णयश्च केन सूत्रेण । 1+1

(6) स्वामी भृत्यं प्रति – जलमानय । अत्रोदारहणे कः लकारः । कस्मिन्नर्थे च । 1+1

(7) आतीत् इत्यत्र ईट् केन सूत्रेण । कश्च तत्सूत्रार्थः । 1+1

(8) दीव्यति इति रूपसिद्धौ हलि च इति सूत्रेण किं विधीयते। अस्य सूत्रस्य कोऽर्थः। 1+1

(9) पौषम् इत्यत्र कस्तद्धितप्रत्ययः । तद्विधायकसूत्रं च किम् । 1+1

(10) गोता इत्यत्र तद्धितप्रत्ययः कः । तद्विधायकं सूत्रं किम् । 1+1



Downloaded From :http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) सप्तमीविशेषणे बहुव्रीहौ इति हलदन्तात् सप्तम्याः संज्ञायाम् इत्यनयोरेकं सूत्रं व्याख्यात ।

(2) दण्डिनी भवन्ती इत्यनयोः एकं रूपं ससूत्रं साधयत ।

(3) गणकी वृषली इत्यनयोः एकं रूपं ससूत्रं साधयत ।

(4) अजाद्यदन्तम् इति अल्पाच्तरम् इति अनयोरेकं सूत्रं व्याख्यात ।

(5) एधिषीय एधिषीरन् इत्यनयोरेकं रूपं ससूत्रं साधनीयम् ।

(6) तुदादिभ्यः शः इति सूत्रं व्याख्यात ।

(7) क्र्यादिभ्यः श्ना इति सूत्रं व्याख्यात ।

(8) चिण्भावकर्मणोः इति सूत्रम् व्याख्यात ।

(9) तस्याऽपत्यम् इति सूत्रं व्याख्यात ।

(10) मादुपधायाश्च मतोर्वोऽयवादिभ्यः इति सूत्रं व्याख्यात ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) घटमृत्तिका इति समासं ससूत्रं साधयत ।

(2) स्वरितञितः कर्त्रभिप्राये क्रियाफले इति सूत्रं व्याख्यात ।

(3) चेतति गदामि इति अनयोः एकं रूपं ससूत्रं साधयत ।

(4) भवितारः शोचितारौ इति अनयोरेकं रूपं ससूत्रं साधनीयम् ।

(5) हेतुमति च इति सूत्रं व्याख्यात ।

---



Downloaded From : http://cbseportal.com/ Courtesy : NIOS